नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 21

No. of Printed Pages — 7

# VU—20–2—Sans. Vangmay II

# वरिष्ठ उपाध्याय परीक्षा, 2010

## संस्कृत वाङ्मय

## द्वितीयपत्रम्

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येक प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येक प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयम् ।

| प्रश्न क्रमाङ्कः | समुचितम् उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

**बहुविकल्पीयाः प्रश्नाः**

1. (i) अम्बिकादत्तव्यासस्य पितुर्नाम् आसीत्

(अ) दुर्गादत्तः (ब) महादेवः

(स) मोहन सिंहः (द) श्रवणः । 1

(ii) राजपुत्राणां प्रदेशः वर्तते

(अ) राजस्थानम् (ब) बिहार प्रान्तः

(स) महाराष्ट्रः (द) गुर्जर प्रदेशः । 1

(iii) मेवाड़भूमेः गौरव प्रतीकः वर्तते

(अ) हिमालय पर्वतः (ब) चितौड़ पर्वतः

(स) धौलगिरीः (द) अचलगढ़ पर्वतः । 1

(iv) चन्द्रगुप्तस्य मातुर्नाम् आसीत्

(अ) माधविका (ब) मुरा

(स) मञ्जरिका (द) नानकी । 1

**अतिलघूत्तरात्मकाः प्रश्नाः**

2. आमेराधीशः कस्य लालाटिकः आसीत् ? 1

3. पद्मिनी कस्य राज्ञी आसीत् ? 1

4. राघवदेवः कस्य पुत्रः आसीत् ? 1

5. अमात्यः कं प्रति कृतज्ञतां ज्ञापयति ? 1

**लघूत्तरात्मकाः प्रश्नाः I**

6. कस्याः नद्याः जलं शीतलं वर्तते, स सिंह दुर्ग-समीपे प्रवहति ? 2

7. चितौड़ वृक्षस्थले लम्बमाना का नक्षत्रमाला इव शोभते ? $1\frac{1}{2}$

8. कस्मिन् मन्दिरे नतो जनः सर्वत्र उन्नतो भवति ? $1\frac{1}{2}$

9. रूपकस्य कति भेदाः ? के च ते ? 2

**लघूत्तरात्मकाः प्रश्नाः II**

10. शिवराजविजयस्य रचयितुः संक्षिप्त परिचयो देयः । 3

11. चित्रकूटनगर्याः पुराकालिकं सौन्दर्यं वर्णनीयम् । 3

12. चाणक्यः राज्यप्राप्तेच्छुकः कथं न भवति ? 2

13. चन्द्रगुप्तः सिंहासने प्रतिष्ठितं भूत्वा चाणक्यं किं कथयति ? 2

14. बालिका चाणक्यस्य चरित्रचित्रणे किं कथयति ? 2

**निबन्धात्मकाः प्रश्नाः**

15. अधोलिखितेषु कयोश्चिद् **द्वयोः** गद्यांशयोः प्रसङ्ग-कोष-व्याकरणालङ्कारपुरस्सरं संस्कृत व्याख्या कार्या — $\left(\frac{1}{4}+\frac{1}{4}+\frac{1}{4}+\frac{1}{4}+2\right)\times 2 = 6$

(अ) दिल्लीश्वर-पद-विडम्बनमपि चाहं तादृशेष्वेवान्यतममवगत्य क्षणेनैव तत् सम्बन्ध-सूत्रं त्रोटयित्वा रसिकान्तरं कमपि वीरमन्विष्यन् दक्षिणां दिशं प्रस्थितोऽस्मि पथि चामेर-देशाधीशेन बहुशः प्रार्थ्यमानोऽपि स तस्यैव दिल्ली-वलय-कलकङ्कस्य लालाटिक इत्यवगत्य, शिववीर-कीर्त्तीश्च श्रावं श्रावं कर्णयोराकृष्ट इव इतः समायातोऽस्मि, द्रक्ष्यामि किं भावि ?

(ब) भगवान् ! अस्माकं स्थूलकायाः सरल-भूभाग-मात्र-धावनाभ्यासिनो हयाः, तदुपरि च महाकवचाः शस्त्रास्त्र महाभारभृतः सादिनः इति ते न शक्नुवन्ति उदघाति नीषु उपत्यकासु तथा अश्वांश्चालयितुं यथा महाराष्ट्रा लघुत्रिः पार्वतघोटकैरुन्दुरव इव कुहरेषु निविशन्ते । मर्कटा इव सानुमत्सानून्यारोहन्ति ।

(स) चान्द्रखानस्तु महादेवस्य वार्त्ताः श्रावं श्रावम् ''अप्येष स्वयं शिववीरः, अपि वा तस्यैव कश्चिदनुजः सहचरो वा ? यतः संवादिनी आकृतिरनुकारिणी च वागस्ति'' — इति संशयानः, मुहुर्मुहुः परामर्श-पराभ्यां नयनाभ्यां तं निपुणं निरीक्षमाणः, चमूपतिरन्यादृश इति स्वाभिप्रायं प्रकटयितुमप्यनीहमानः उत्थित एवास्मिन् स्वयमप्युत्तस्थौ ।

16. अधोलिखितेषु कयोश्चिद् **द्वयोः** गद्यांशयोः प्रसङ्ग-कोष-व्याकरणालङ्कारादि पुरस्सरं संस्कृत व्याख्या कार्या — $\left(\frac{1}{4}+\frac{1}{4}+\frac{1}{4}+\frac{1}{4}+2\right) \times 2 = 6$

(अ) अहो ! न दुर्घटमाक्रमणमेतस्य शास्तिरवान - वराकस्य । नगराद् बहिरेतस्य सेना, प्रासादरक्षका अपि च प्रासादादस्माद् दूरतो मन्दुरासु वसन्ति, यथासमयं च पञ्चषाः समागत्य द्वारि तिष्ठन्ति, प्रासादस्य पृष्ठदेशे विशालमुद्यानम् । नात्र रात्रौ कोऽपि मनुष्यो विचरति । उद्यानं परितस्तु लोह-दण्ड-प्रवारः, यमुल्लङ्घ्य यतस्तत एव प्रविविक्षुः प्रवेष्टुमर्हति ।

(ब) तेषु चेतस्ततः पलायन-परेषु शास्तिरवान भवनान्निवृत्तो महादेवपण्डितोऽप्यकस्मादुपस्थाय "किमिव स्वामिन् ! किमिति कुपितोऽसि" इति पर्यप्राक्षीत् । स तु तमेव ताडयितुमिव वाद्यमुदतूलत् । महादेवस्तु भीत इव पलायितः काञ्चन महान्धकारावृत-वीथिं प्रविष्टः, तत्पश्चादेव चायमपि तस्मिन्नेवान्धकार समुद्रे निमग्नः ।

(स) महाराज ! यथा श्येनो व्रज-निष्पेष-निष्ठुरैर्निज-चञ्चु-चरणाघातैर्दीनान् भयविह्वलान् पतत्रिणो निहत्य व्याधाय समर्पयति, स्वयं च वधमात्रफलभाग् भवति, तथाभूतं व्रतं न शोभते श्रीमति, यन्निरर्थं स्वतन्त्रा अपि प्रजा विजित्य, केवलमविचार-व्यभिचार-प्रचाराय धूर्तानामेषां यवनानां हस्ते समर्प्यन्ते ।

17. अधोलिखितेषु कयोश्चिद् **द्वयोः** पद्ययोः प्रसङ्गान्वयकोषछन्दसहिता संस्कृतव्याख्या विधेया —

$$\left(\frac{1}{2}+\frac{1}{2}+\frac{1}{4}+\frac{1}{4}+2\right)\times 2 = 7$$

(अ) अत्रैव कोकिलविनिन्दिमनोज्ञ कण्ठी,

श्री कुम्भकर्णनृपतेस्तनया रमापि ।

उत्सन्नतामुपगतां स्वपितुः प्रवृत्ताम् ,

सङ्गीतशास्त्र सरणिं पुनरुद्द्धार ॥

(ब) भ्रान्त्वा चिरम् शिथिलितावयवेषुसौध -

प्रासाद-निर्झर-सरोवर-गोपुरेषु ।

आलोकितेयमखिलापि विशीर्णकाया

श्री चित्रकूटनगरी ननु वीरभूमिः ॥

(स) दुःखं न यत्र न भयं न जरा न रोगः,

नैवाधयो न विकृति र्न मदो न मोहः ।

शश्वत् प्रशान्त् सुगभीर-महार्णवाभम्

तन्माधवस्य चरण-द्वितयं भजध्वम् ॥

18. वीरभूमि काव्यस्य रचयितुः परिचयो लेख्यः । 4

19. अधस्तन पद्ययोः कस्यचिद् एकस्य प्रसङ्गान्वयछन्दोऽलङ्कारादि पुरस्सरं संस्कृते व्याख्या कार्या —

$$\frac{1}{2}+\frac{1}{2}+\frac{1}{2}+\frac{1}{2}+1\frac{1}{2}=3\frac{1}{2}$$

(अ) कदली-क्षीरदानेन पोषितोऽपि भुजङ्गम् ।

दशति प्राणदातारं न करोति विचारणाम् ॥

(ब) अनासक्तिश्च तेजश्च नीतिः कारुण्यमेव च ।

वीर्यं चरित्रमाधुर्यं कौटिल्ये सर्वसम्भवः ॥

20. अधोलिखित गद्यांशयोः कस्यचिद् एकस्य प्रसङ्गकोषव्याकरणादि पुरस्सरं संस्कृते व्याख्या विधेया — $\frac{1}{2} + \frac{1}{2} + \frac{1}{2} + 2 = 3\frac{1}{2}$

(अ) चाणक्यः इह भित्तिगात्रे किमपि रहस्य विद्यते । अत्रारुण वर्णाङ्कितस्थाने गुप्तद्वारं भवेत् । मन्त्रणाकक्षाद् बहिः प्राङ्गणे कोऽपि मृदुपद सञ्चारं करोति चेत् तत्क्षीणोऽपि शब्दः श्रुतिपथमायासि । अनेन छिद्रपथेनान्तरालाद् बहिर्व्यापारो दृश्यते ।

(ब) बालिका : देव ! प्रवर्तते साम्प्रतं नगरे कौमुदीमहोत्सवः । तेनानन्दमुखरे कुसुमपुरं विविध सुखानुष्ठानेषु निमज्जति सपार्षदो नरपतिः, सपरिजनाश्च नागरिका उत्फुल्ला नृत्यगीतपान-भोजनैर्मोदन्ते ।

21. चाणक्यस्य चरित्रचित्रणं विवेचनीयम् । 3